# वैदिकमन्त्रस्य लक्षणं मन्त्रनिष्ठशक्तेश्च विवेचनम्

**Madhav Janardan Ratate**

Department of Mimnsa-Dharmashastra, Banaras Hindu University, Varanasi-5

***Abstract***

*The word mantra is derived from dhatumantra. The distinguishing feature of the Veda is (मन्त्रब्राह्मणयोर्वेदनामधेयम्). It has been said in 'Mimansa Nyaya Prakash' (page 193) about mantras मन्त्राणाम् प्रयोगसमवेतार्थस्मारकतया अर्थवत्त्वम् At the time of Karmmanusthan devata and dravya are invoked by mantras. The word mantra has been used at many places in the mantra portion of the vedas eg (मन्त्रम् मनसा वनोषिताम् (ऋ. १.३१.१३) मन्त्रं वदत्युक्थयम् (१.४०.५) अहे बुध्निय मन्त्रम् मे गोपाय (तै.ब्रा. १.२.१)) etc.*

*Regarding characteristics of mantras, various distinguishing features have been put forward by opponents, but they all are fallacious, e.g. if it is said (विहितार्थभिधायको मन्त्रः) it will become avyapti in vidhiroop mantra - वसन्ताय कपिञ्जलानालभेत If featured as मननहेतुर्मन्त्रः it will be ativyapti in Brhman part. If characterized as असिपदान्तो मन्त्रः and उत्तमपुरुषान्तो मन्त्रः it will be a case of avyapti also. Thus in that absence of any 'Lakshna' free from fallacy the ancient scholars have addressed whichever proposition as 'Mantroyam' is called mantra.*

*Mantra Shakti (efficacy) according to Mimamsakas:*

*According to the Mimamsakas the power inherent in the mantras is 'apurva' or 'adrishta' unless or untill supported by the Niyama Vidhi मन्त्रैरेव स्मर्तव्यम् apurva is not generated so the result of niyam is adrishta.*

भगवान् वेद एव धर्ममीमांसायाः आधारः वर्तते। तत्र वेदस्य लक्षणं तावत् 'मन्त्रब्राह्मणात्मको वेदः'[१] इति विहितमस्ति। तत्र मन्त्र् धातोः अच् प्रत्यये कृते सति मन्त्रशब्दस्य निष्पत्तिः भवति।[२]

वेदस्य मन्त्रभागे मन्त्रशब्दस्य बहुधा उल्लेखः वर्तते। यथा- मन्त्रं मनसा वनोषितम्[३], मन्त्रं वदत्युक्थम्[४], हृदा यत्तष्टान् मन्त्रम् अशंसन, मन्त्रं वोचेमाग्नये[६], आ नो मन्त्रं सरथे होपयातम्[७] इत्यादिषु। एवञ्च ब्राह्मणभागेऽपि मन्त्रशब्दः श्रूयते। यथा- अहे बुध्निय मन्त्रं मे गोपाय।[८]

एवं मन्त्रस्य किं लक्षणमिति जिज्ञासायां सत्याम् अर्थङ्गहे मन्त्रप्रकरणे प्रायिकताया मन्त्रस्य लक्षणं विहितम्-प्रयोगसमवेतार्थ-स्मारकाः मन्त्राः।[९] इदं लक्षणम् अव्याप्तिदोषग्रस्तं वर्त्तते। यतः मन्त्राणां प्रयोगसमवेतार्थस्मारकत्वभिन्नं स्तुत्यामन्त्रणप्रैषादिरूपत्वमपि वर्त्तते। एवं सति विहितार्थाभिधायको मन्त्रः इति मन्त्रस्य लक्षणं क्रियते चेत् वसन्ताय कपिञ्जलानलभेत[१०] इति विधिरूपे मन्त्रे अव्याप्तिः। मननहेतुर्मन्त्रः इत्युक्ते ब्राह्मणे अतिव्यप्तिर्जायते। असिपदान्तो मन्त्रः, उत्तमपुरुषान्तो मन्त्रः इत्यादिलक्षणानां परस्परम् व्याप्तिः।

एवं कस्यापि लक्षणस्य निर्दुष्टत्वाभावे सिद्धान्तरूपेण एतत् कथ्येत यत् याज्ञिकैः 'मन्त्रोऽयम्' इत्यभिधाय मन्त्रशब्देन यदभिहितं तदेव मन्त्रः। वेदे बहुप्रकारकाः मन्त्राः दृश्यन्ते।

यथा- उरू प्रथस्व[११] इत्ययम् अनुष्ठानस्मारकः मन्त्रः। अग्निमीळे पुरोहितम्[१२] इति स्तुतिरूपः मन्त्रः। इषे त्वा[१३] इत्यादयः त्वान्ताः मन्त्राः। अग्न आ याहि वीतये[१४] इत्यादयः आमन्त्रणरूपाः मन्त्राः। अग्नीदग्नीन् विहर[१५] इत्यादयः प्रैषरूपाः मन्त्राः। अधः स्विदासीत्[१६] इत्यादयः विचाररूपाः मन्त्राः। अम्बे अम्बिके अम्बालिके न मा नयति कश्चन[१७] इत्यादयः परिदेवनारूपाः मन्त्राः। पृच्छामि त्वा परमन्तं पृथिव्याः[१८] इत्यादयः प्रश्नरूपाः मन्त्राः। वेदिमाहुः परमन्तं पृथिव्याः[१९] इत्यादयः उत्तररूपाः मन्त्राः। एवमन्येऽपि विविधप्रकारकाः मन्त्राः दृश्यन्ते। इत्थं बहुप्रकारकेषु मन्त्रेषु कोऽपि सामान्यधर्मः नास्ति यस्य मन्त्रलक्षणत्वेन व्यवहारः स्यात् । अतः वैदिकाभियुक्तानां या समाख्या 'मन्त्रोऽयम्' तदेव मन्त्रलक्षणम्।[२०] लक्षणेऽस्मिन् अव्याप्त्यादिदोषाणामभावः अस्ति।

Vijnana Bharati

***मीमांसकमतानुसारं मन्त्रशक्तिः***

अधुना मन्त्रनिष्ठा शक्तिः विचार्यते। साहित्यशास्त्रे शब्दानां तिस्रः शक्तयः उक्ताः सन्ति- अभिधा, लक्षणा, व्यञ्जना चेति। ताभिः शक्तिभिः अर्थस्य बोधः जायते। मीमांसकमतानुसारं यागादिकर्मणः स्वर्गं प्रति साधनत्वम् अपूर्वं परिकल्प्य सिद्ध्यति। तदपूर्वं किमित्यपेक्षायां भाट्टाः कार्यकारणरूपयोः स्वर्गयागयोः अवान्तरव्यापार एव अपूर्वम् इति वदन्ति। अत एव व्यापारवान् याग एव स्वर्गं प्रति करणं वर्त्तते। एवं सति यथा उद्यमननिपातनयोः अवान्तरव्यापारयोः सत्त्वे एव कुठारस्य कर्तनसाधनत्वं भवति। व्यापारमन्तरेण तस्य साधनत्वं न सम्भवति। एवं सति यदा व्यापारवान् यागः समाप्तिमेति, तदा कथं यागस्य स्वर्गसाधनत्वं सिद्ध्येत। अत एव कैश्चित् मीमांसकैः यागजन्या शक्तिः एव अपूर्वं कथ्यते। अत एव यागे नष्टेऽपि तज्जन्या शक्तिः कर्तुरात्मनि तिष्ठन्ती स्वर्गं प्रापयति। यथा प्रज्वलितानाम् अङ्गाराणां जले प्रक्षेपानन्तरं तेषामौष्ण्यं जले समायाति, तथैव यागे विनष्टेऽपि तेनोत्पन्ना शक्तिः फलं प्रापयति। इत्थम् अपूर्वं शक्तिरूपं वर्तत इति सिद्ध्यति।

एवं सति मन्त्रेषु या शक्तिः वर्तते साऽपि अपूर्वमेवास्ति इति सिद्ध्यति। यागादिषु तत्तत्कर्मसु तत्तन्मन्त्राः प्रयुक्ताः सन्ति। यथा "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते"[२१] इति विधिवाक्येन इमामगृभ्णन् रशनामृतस्येति मन्त्रः अश्वरशनाग्रहणस्य अङ्गं वर्तते। यदि विधिमननुसृत्य अश्वरशनाग्रहणं क्रियते, तर्हि मन्त्ररूपाङ्गेन जन्यं यदङ्गापूर्वम् तत् न उत्पद्यते। एमवेव 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते'[२२] इत्यत्र तृतीयाश्रुत्या ऐन्द्री ऋचा् गार्हपत्योपस्थानाङ्गं भवति। एतेन सिद्ध्यति यत् मन्त्ररूपाङ्गेन यदङ्गापूर्वं समुत्पद्यते तदेव मन्त्रनिष्ठा शक्तिः वर्तते।

'मन्त्रैरेव स्मर्तव्यम्'[२३] इति नियमविधिनाऽपि एतदेव गम्यते यद् यदि मन्त्रं विना यागेषु पदार्थस्मरणम् भवति तदा नियमजन्यमपूर्वं न उत्पद्यते। यथा- उरु प्रथस्वेति[२४] मन्त्रेण यत् पुरोडाशरूपार्थप्रकाशनं भवति तदेव प्रकाशनम् 'उरू प्रथस्वेति पुरोडाशं प्रथयति'[२५] इति ब्राह्मणवाक्येनाऽपि सम्भवति। परन्तु मन्त्रैरेव स्मर्तव्यमिति नियमविध्याश्रयणेन मन्त्रेणैव अर्थस्मरणेनेति। अतः मन्त्रनिष्ठा शक्तिः अपूर्वमेव इति सिद्ध्यति।

इयं मन्त्रनिष्ठा शक्तिः न केवलं मन्त्रोच्चारणेन आविर्भवति, अपितु शुद्धस्वरप्रयुक्तमन्त्रोच्चारणेन। एतदभिप्रेत्यैव महर्षिणा पाणिनिना शिक्षायामुक्तम् -

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।[२६]

अतः शुद्धस्वरप्रयुक्तत्वं मन्त्रशक्तौ आवश्यकम्। मन्त्रोच्चारकव्यक्तेः शुद्धत्वमपि मन्त्रशक्तौ नियामकं वर्तते।

***वैज्ञानिकमतमधिकृत्य मन्त्रशक्तेः फलजनकत्वम्***

मन्त्रशक्तिः कथं फलं प्रददातीति वैज्ञानिकमतमवलम्ब्य प्रस्तूयते। विज्ञानानुसारं ध्वनितरङ्गाः सर्वेषु चराचरेषु पदार्थेषु प्रभवन्ति। ध्वनेः वारंवारतायाः (फ्रीक्वेन्सी) अनुसारं तस्य ध्वनेः तीव्रत्वं मन्दत्वं वा भवति। ध्वनेः तीव्रतया वस्तुषु कम्पनं कदाचित् विस्फोटो वा सम्भवति।

अनया दृष्ट्या मन्त्रेषु यः ध्वनिः विद्यते सोऽपि सर्वेषु चराचरपदार्थेषु स्वीयं बलं दर्शयति। अयं मन्त्रगतः ध्वनिः प्रतिमन्त्रं भिन्नः वर्तते। यतः प्रतिमन्त्रं स्वरभेदः उच्चैस्त्वादिधर्मभेदोऽपि वर्तते। ज्योतिष्टोमप्रकरणे 'उच्चैर्ऋचा क्रियते, उपांशु यजुषा, उच्चैः साम्ना'[२७] इति वाक्येन उच्चैस्त्वादिधर्मः मन्त्रेषु विहितः। इत्थं मन्त्रध्वनेः भिन्नत्वात् तेन मन्त्रध्वनिना उत्पन्नं यदपूर्वं तदपि भिन्न-भिन्नरूपेण सर्वं चराचरं पदार्थं प्रभवति।

एवमेव अथर्ववेदे रोगनाश-सुखप्रसूति-शत्रुनाश-दीर्घायुः-प्राप्त्यादिफलेभ्यः अनेके मन्त्राः विहिताः। यथा-

यथा वातो यथा मनो यथा पतन्ति पक्षिणः।
एव त्वं दशमास्य साकं जरायुणा पताव जरायु पद्यताम्।।[२८]

अयं नारीणां सुखप्रसूतिमन्त्रः।

तत्रैव रोगनाशकमन्त्रः विद्यते-

यथा द्याञ्च पृथिवीं चान्तस्तिष्ठति तेजनम्।
एवा रोगं चास्रावं चान्तस्तिष्ठन्तु मुञ्ज इत्।।[२९]

दीर्घायुःप्रदः मन्त्रः -

यदाबध्नन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः।
तत् ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशारदाय।।[३०]

एतेषां मन्त्राणां स्वरयोजना प्रतिमन्त्रं भिन्ना वर्तते। अनया भिन्नया स्वरयोजनयैव मन्त्रः फलं प्रकटयति। प्रसङ्गेऽस्मिन् एक्यूप्रेशरचिकित्सापद्धतेः दृष्टान्तं द्रष्टव्यम्। तस्याः पद्धतेरनुसारं मनुष्यस्य शरीरे अङ्गेषु केचन बिन्दवः सन्ति येषु सम्पीडनेन स्वास्थ्यलाभः जायते। एतदनुसृत्य किञ्चित् नावीन्यं प्रस्तौमि। वयं जानीमः यत् मस्तिष्कस्य प्रभावः शरीरे जायते। अतः मनुष्यस्य मस्तिष्के अपि एतादृशाः बहवः बिन्दवः सन्ति येषु मन्त्रध्वनिना

Vijnana Bharati

सम्पीडनेन स्वास्थ्यलाभः उपजायते। यथा रोगनाशकमन्त्रेण मस्तिष्के रोगनाशकबिन्दौ सम्पीडनं भवति येन रोगनाशः भवति। दीर्घायुःप्रदः मन्त्रः दीर्घायुःकारकबिन्दौ प्रभावं करोति। एवमेव आगमोक्तेषु मन्त्रेष्वपि कल्पनीयम्। मन्त्रद्वारा स्वास्थ्यलाभे इदमेव कारणम्। एवं तत्तत्स्वरेषु उपनिबद्धानां मन्त्राणां शक्तिः ध्वनिद्वारा मनुष्यस्य मस्तिष्कं सर्वं चराचरं पदार्थं च आवर्जयति। इत्येव मन्त्रशक्तेः वैज्ञानिकः आधारः।

अतएव वेदे मनसः शिवसङ्कल्पितत्वम् प्रार्थितम्। अन्ते शिवसङ्कल्पमन्त्रमुक्त्वैव विरमामि –

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेभीषुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु।।[31]

*सन्दर्भ :*


१. आपस्तम्बपरिभाषा, ३१
२. आप्टे संस्कृत-हिन्दीकोशः, पृ० ७७४
३. ऋ.सं. १.२.३४.१३
४. ऋ.सं. १.३.२०.५
५. ऋ.सं. १.५.११.४
६. ऋ.सं. १.५.२१.१
७. ऋ.सं. ८.६.२.११
८. तै.ब्रा. ९.२.१.२६
९. अर्थसङ्ग्रहः, पृ० १४४ (मन्त्रप्रकरणम्)
१०. माध्य.सं. २४.२०
११. तै.सं. १.१.८
१२. ऋ.सं. १.१.१
१३. तै.सं. १.१.१
१४. ऋ.सं. ४.५.२२
१५. श.ब्रा. ४.२.४.११
१६. तै.ब्रा. २.८.९.५
१७. माध्य.सं. २३.१८
१८. तै.सं. ७.४.१८
१९. तै.सं. ७.४.१८
२०. जैमिनीयन्यायमाला, मन्त्रलक्षणाधिकारणम् (२.१.७)
२१. मीमांसान्यायप्रकाशः, श्रुतिनिरूपणम्, पृ० ३०
२२. मीमांसान्यायप्रकाशः, श्रुतिनिरूपणम्, पृ० ३०
२३. अर्थसङ्ग्रहः, पृ० १४४
२४. तैत्ति. संहिता १.१.८
२५. जैमिनीयन्यायमाला, पृ० २७ (मन्त्राधिकारणम् १.२.४)
२६. पाणिनीयशिक्षा (श्लोक ५२)
२७. ऐतरेयब्राह्मणम् (५.५.६)
२८. अथर्ववेदः, १.११.६
२९. अथर्ववेदः, १.२.४
३०. अथर्ववेदः, १.३५.१
३१. शुक्लयजुर्वेदः ३४.१-६


Vijnana Bharati